P: ISSN NO.: 2394-0344 RNI No.UPBIL/2016/67980 VOL-4* ISSUE-1* (Part-2) April- 2019
E: ISSN NO.: 2455-0817 Remarking An Analisation

# न्याय–वैशेषिकदर्शनानुसरं प्रत्यक्षविमर्शः

**सुधांशु कुमार षड़ङ्गी**
सहाचार्यः
विश्वेश्वरानन्द–विश्ववन्धु–संस्कृत–भारत–भारती–अनुशीलन–संस्थानम्
पञ्जाबविश्वविद्यालयः,
साधु–आश्रमः, भारत

**सारांश**

दर्शनशास्त्रेषु बुद्धिशब्दः ज्ञाने ज्ञानकरणे ज्ञानाश्रये च प्रसिद्धः। तत्र तावत् न्यायवैशेषिकदर्शने बुद्धिशब्दस्य ज्ञानरूपः अर्थः अङ्गीकृतः। अत्र या उपलब्धिः यच्च ज्ञानं तदुभयं बुद्धितो न भिन्नम्। ज्ञानमिदमात्मनो गुणत्वेनाऽत्र स्वीक्रियते। इदं ज्ञानमचेतनाज्जगतः चेतनजगतः भेदकमस्ति। चैतन्यवशादेव प्राणिजगदप्राणिजगतो भिद्यते, तच्च चैतन्यं न्यायवैशेषिकदर्शनानुसरेण ज्ञानमेवास्ति। प्रत्यक्षं ज्ञानमिन्द्रियार्थयोः सन्निकर्षादुत्पद्यत इति स्वीकर्तुं शक्यते। साङ्ख्य–योगे अन्तःकरणत्रयमिन्द्रियप्रणालिकया विषयदेशं समुपस्थित्य विषयं गृह्णाति, यथा अन्तःकरणत्रयं चक्षुरिन्द्रियप्रणालीद्वारा बाह्यघटप्रदेशं प्राप्य घटाकारेण परिणमते, तदा अयं घटः इति ज्ञानमुत्पद्यते। परन्तु न्याय–वैशेषिके इन्द्रियार्थयोः सन्निकर्षेण ज्ञानमुत्पद्यते। अत्र एवं वक्तुं शक्यते यदयं सन्निकर्षः विषयदेशकाले भवतु अथवा इन्द्रियप्रदेशे, एतस्मात् सन्निकर्षाद् ज्ञानं तूत्पद्यते।

**मुख्य शब्द :** बुद्धिः, ज्ञानम्, क्रिया, शब्दः, उपादानं, हानः, उपेक्षा, निर्विकल्पकम्, विद्या, प्रत्यक्षम्, इन्द्रियम्, उपेक्ष्यत्वबुद्धिः, सविकल्पकम्, ईश्वरः, नित्यं, सामान्यलक्षणा, ज्ञानलक्षणा, योगजलक्षणा

**प्रस्तावना**

दर्शनशास्त्रेषु बुद्धिशब्दः ज्ञाने ज्ञानकरणे ज्ञानाश्रये च प्रसिद्धः। तत्र तावत् न्यायवैशेषिकदर्शने बुद्धिशब्दस्य ज्ञानरूपः अर्थः अङ्गीकृतः। अत्र या उपलब्धिः यच्च ज्ञानं तदुभयं बुद्धितो न भिन्नम्। ज्ञानमिदमात्मनो गुणत्वेनाऽत्र स्वीक्रियते। इदं ज्ञानमचेतनाज्जगतः चेतनजगतः भेदकमस्ति। चैतन्यवशादेव प्राणिजगदप्राणिजगतो भिद्यते, तच्च चैतन्यं न्यायवैशेषिकदर्शनानुसरेण ज्ञानमेवास्ति। वैशेषिकसूत्रे ज्ञानस्य किमपि स्पष्टं लक्षणं नोपलभ्यते। न्यायसूत्रे च बुद्धितः उपलब्धितश्च योऽर्थः भिन्नो न भवति तज्ज्ञानमिति लक्षणं सूचितम्। परन्तु लक्षणमिदं ज्ञानशब्दस्य बुद्धिरुपलब्धिः इत्युभयशब्दापेक्षयाऽप्रसिद्धं द्योतयति। अनेनेदमायाति यत् यो जनः बुद्धिशब्दार्थमुपलब्धिशब्दार्थञ्च जानाति परं ज्ञानशब्दार्थं न जानाति सः एतल्लक्षणानुसारेण बुद्धिशब्दस्योपलब्धिशब्दस्य चार्थः ज्ञानशब्दार्थ इति ज्ञातुं न शक्नोति। परमेतावन्मात्रेण लक्षणं स्फुटं न भवति। प्रशस्तपादभाष्ये न्यायसूत्रकारस्य गौतमस्य वचनमिदमाश्रित्य बुद्धिरूपलब्धिः ज्ञानं प्रत्यय इति पर्याया इत्युक्तम्। तदनुसारेण बुद्धिरूपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः।[1] अत्र यस्मिन् सत्यात्मनि जानामीति अनुव्यवसायो भवति सा बुद्धिरिति दीपिकाकारो वक्ति।[2] अत्र बुद्धिज्ञानयोरभेदं दर्शयितुं तर्कसङ्ग्रहकारोऽपि तल्लक्षणप्रकाशने प्रतिपादयति यत् –

सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्।[3]

सर्वव्यवहाराऽसाधारणहेतुत्वे सति गुणत्वं लक्षणम्। अत्र दण्डादिवारणाय सर्वव्यवहारेति, कालेश्वरेच्छादावतिव्याप्तिवारणाय असाधारणेति, बुद्धेः साङ्ख्याऽभिमतद्रव्यत्वनिरसनाय गुण इति प्रतिपाद्यते। अतः ज्ञानं विना शब्दप्रयोगाद्यसम्भवाच्छब्दप्रयोगादिरूपव्यवहारहेतुत्वं ज्ञानस्य लक्षणम्।

उदयनाचार्येण बुद्धेः लक्षणान्तरमपि प्रदर्शयति। यथा – अर्थप्रकाशो बुद्धिरिति।[4] अयमभिप्रायः जगति विद्यमाना अपि अर्थाः न हि सदा सर्वस्य प्रकाश्यते, किन्तु कश्चिदेवार्थः कस्यचिदेव पुंसः कस्मिंश्चिदेव देशे कस्मिंश्चिदेव काले च प्रकाश्यते। तेनेदं ज्ञायते यदर्थस्य सद्भावः अर्थस्य प्रकाराश्चेत्युभयं भिन्नम्। अर्थस्य वर्त्तमानत्वेऽपि उक्तरीत्याऽप्रकाशमानत्वात् तस्य चार्थस्य यः प्रकाशः सः एवार्थस्य बुद्धिः। बुद्धिगोचरैवाऽर्थः मनुष्यस्योपयोगायाकल्पनेनाप्रकाशमानेन स्वरूपसत्तापि तेन कस्यापि पुरुषस्य प्रयोजनासिद्धेः।

शिवादित्येन सप्तपदार्थ्यां बुद्धित्वसामान्यवती आत्माश्रयः प्रकाशो बुद्धिः[5] इत्येवं बुद्धिलक्षणं कृतम्। लक्षणमिदमुदयनाचार्योक्तं द्वितीयलक्षणमुपजीवति। अत्रापि प्रकाशस्यैव बुद्धित्वं प्रतिपादितम्। तल्लक्षणापेक्षया एतल्लक्षणे प्रकाशाश्रयस्यात्मनः बुद्धेः बुद्धित्वसामान्ययोगस्य चाधिकस्य कथनं कृतम्। लक्षणस्यास्य विमर्शे रूपद्वयं निष्पद्यते। यथा – बुद्धित्वसामान्यवती बुद्धिरिति आत्माश्रयप्रकाशे बुद्धिरिति च।

प्रथमरूपानुसारेण बुद्धित्वनामकं सामान्यं समवायसम्बन्धेन बुद्धेर्लक्षणं पर्यवस्यति। द्वितीयरूपानुसारेणात्मनिष्ठस्य प्रकाशस्य बुद्धित्वं पर्यवस्यति। घटः प्रकाशते इत्यादिव्यवहारानुरोधेन घटाद्याश्रितोऽपि विषयतालक्षणः प्रकाशः सिद्धयति। तत्र बुद्धिलक्षणस्यातिव्याप्तिवारणायात्मनिष्ठत्वमिति प्रकाशघटकविशेषणं लक्षणघटकतया प्रोक्तम्। प्रस्तुते बुद्धिलक्षणे प्रकाशे आत्माश्रितत्वकथनात् साङ्ख्यादिभूतमपि निराकृतं भवति। तत्र अन्तःकरणपर्यायाः आत्मश्रितत्वानभ्युपगमात् ।

वस्तुतः व्यवहारो हि द्विविधः, क्रिया शब्दश्चेति। क्रिया च त्रिविधा – उपादानं, हानः, उपेक्षा च। अत्र एषु इतरसाधनत्वेन ज्ञातस्य वस्तुनः उपदानं भवति। अनिष्टसाधनत्वेन ज्ञातस्य वस्तुनः हानं भवति। इष्टानिष्टयोरसाधनत्वेन ज्ञातस्य वस्तुनः उपेक्षा भवति। शब्दात्मको व्यवहारस्तु तत्तदर्थवोधनेच्छया शब्दप्रयोगः। यदर्थबोधकत्वेन ज्ञायते तस्य शब्दस्य तदर्थवोधनेच्छया प्रयोगोच्चारणं क्रियते। उक्तव्यवहारजनकज्ञानानां विशिष्टज्ञानतया निर्विकल्पकज्ञानस्य चाऽतादृशत्वेन व्यवहारजनकतया तत्रोक्तलक्षणस्याव्याप्तिः प्रसज्यते। तद्वारणाय उक्तलक्षणं तादृ शज्ञानवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्वमित्येवं परिष्करणीयं तथा च तादृश्याः ज्ञानत्वजातेः निर्विकल्पकेऽपि वृत्तितया नाव्याप्तिः।

वाक्यवृत्तिकारेण त्वोक्ताव्याप्तिवारणायोक्तलक्षणं तादृशव्यवहारजनकतावच्छेदकजातिमत्वमित्येवं परिष्कृतम्।[6] परं तन्न समीचीनं, जहासायाः उपादित्सायाश्च हानोपादानयोः कारणतया तत्तदर्थबुबोधयिषायाः तत्तदर्थबोधकशब्दप्रयोगकारणतया च तादृशव्यवहारजनकतावच्छेदकस्य इच्छात्वजातौ सत्वेन इच्छायामतिव्यप्तिप्रसक्तेः। न्यायवैशेषिकदर्शने घटादिभिः चक्षुरादिसन्निकर्षादनन्तरमुत्पन्नस्य घटादिज्ञानस्य मानसप्रत्यक्षं भवतीति मन्यते, तदेव प्रत्यक्षं घटं जानामीत्याद्याकारकः अनुव्यवसाय उच्यते। तदेवं ज्ञानस्यानुव्यवसीयमानतया तत्रोक्तलक्षणस्य समन्वयः सम्पद्यते। किन्तु यथाश्रुतमिदमपि लक्षणं निर्विकल्पकज्ञानस्यातीन्द्रियत्वेऽनुव्यवसायागोचरतया तत्राव्याप्तमतो इदं लक्षणमपि जानामि इत्याकारकानुव्यवसाय विषयवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्वमित्येवं परिष्करणीयं तथा च तादृश्याः ज्ञानत्वजातेः निर्विकल्पकेऽपि सत्त्वेन न तत्राव्याप्तिः।

**ज्ञानप्रभेदाः**

न्यायवैशेषिकदर्शनयोः ज्ञानविभाजनसमस्याऽपि सरला नास्ति। तर्कभाषाप्रभृतिग्रन्थेषु ज्ञानं प्रथमतो नित्यानित्यभेदाभ्यां द्विविधं प्रतिपादितम्। प्रशस्तपादभाष्ये विद्याऽविद्याभेदाद् ज्ञानस्य द्वैविध्यमुक्तम्। भाषापरिच्छेदे अनुभवस्मरणभेदाद् ज्ञानस्य प्रकारद्वयं वर्णितमन्यैः अनेकैः दार्शनिकैः ज्ञानं सविकल्पक–निर्विकल्पकभेदादुभयविधमभ्युपगतं। परन्त्वन्नम्भट्टेन प्रशस्तपादेन केशवमिश्रेण च सविकल्पकनिर्विकल्पकयोः ज्ञानसामान्यभेदत्वमनभ्युपगम्य प्रत्यक्षभेदत्वमेवाङ्गी–कृतम्। उक्तः सर्वैः ग्रन्थकारैः मतान्तराणां ज्ञानसामान्यप्रभेदाः ज्ञानविशेषप्रभेदत्वेनैवाभिहिताः। अस्माद् वैषम्याद् यथार्थायथार्थयोः प्रमाऽप्रमयोः विद्याऽविद्ययोः वा किमप्येकं रूपमद्यावधि निर्धारयितुं शक्यं नार्हत्। केषाञ्चिद् दार्शनिकानां मते तेषां शब्दानामर्थो विस्तृतः केषाञ्चिच्च मते अत्यन्तं सर्पुचितं भवति। उक्तेषु वैविध्येषु सत्स्वपि ज्ञानस्य भेदोपभेदक्रमः वक्ष्यमाणप्रकारेण वर्ण्यमानः समुचितो भवितुमर्हति ।

प्रशस्तपादानुसारं अर्थानन्त्यात्प्रत्यर्थनियतत्वाच्च बुद्धि अनेकधा वर्त्तते। परन्तु तस्याः सत्यप्यनेकविधत्वे समासतो द्वे विधे, यथा विद्या अविद्या चेति।[7] परन्तु समासतः एवं वक्तुं शक्यते यत् ज्ञानं तावद् द्विविधं नित्यमनित्यञ्च। आद्यं परमात्मगतं द्वितीयं च जीवगतम्। अनित्यज्ञानम् यथार्थायथार्थभेदाभ्यां विद्याविद्याभेदाभ्यां वा द्विविधम्। तत्र यथार्थज्ञानं यथार्थानुभवयथार्थस्मृतिभेदात् द्विविधम्। अयथार्थज्ञानमपि अयथार्थानुभवायथार्थस्मृतिभेदाभ्यां द्विविधम्। यथार्थानुभवभेदविषये न्यायवैशेषिकदर्शनयोः मतभेदो विद्यते। वैशेषिकदर्शने तस्य प्रत्यक्षानुमितिभेदात् द्वैविध्यं न्यायदर्शने च प्रत्यक्षानुमितित्युपमितिशाब्दभेदाच्चातुर्विध्यम्।[8] यद्यपि प्रशस्तपादभाष्ये प्रशस्तपादः विद्यायाः चातुर्विध्यं प्रदर्शयति तथापीतरयोरनयोरेवान्तर्भावात् ज्ञानस्य द्वैविध्यमङ्गीकरोतीति निश्चिनुमः।[9] अनन्तरोत्तरकाले यदा न्यायवैशेषिकदर्शने समन्वितैकशास्त्रतया गण्यमाने अभूतां न्यायस्य प्रमाणमीमांसायाः वैशेषिकस्य पदार्थमीमांसायाश्च सम्मिश्रणेन प्रकरणग्रन्थानां रचना प्रावर्त्तत, तदा बहुषु प्रकरणग्रन्थेषु यथार्थानुभवस्योक्ताश्चत्वारो भेदाः स्वीकृता। अयथार्थानुभवस्य विभाजनेऽपि दार्शिनिकानां मिथो मतैक्यं न विद्यन्ते। कतिपयैः संशयविपर्ययतर्कभेदादैः तस्य त्रैविध्यम्, कैश्चिच्च अनध्यवसायस्वप्नयोरपि अयथार्थानुभवरूपतयाऽभ्युपगमनं स्वीकृतम्।

**विद्या**

वैशेषिकसूत्रे कणादः दोषरहितं ज्ञानं विद्या इति वदति।[10] अतः तदभाववति तत्प्रकारकज्ञानभिन्नं ज्ञानं विद्येति सिद्धयति। अनेन लक्षणेन यथार्थानुभवः यथार्थस्मृतिश्चेत्युभयोरेव संग्रहः सम्पद्यते। ये विद्वांसः प्रमायाः विद्यायाश्चाभेदमभ्युपगच्छन्ति तेषां मते स्मृतेः प्रमायामसन्निवेशेन विज्ञत्वं नोपपद्यते। अतो विद्याकोटौ यथार्थानुभवस्यैव यथार्थस्मृतेरपि सन्निवेषाय विद्यायां प्रमायाः भेदश्चाभ्युपगन्तुमुचितः। अतः प्रमाशब्दे प्रयोक्तव्ये विद्याशब्दस्योपलभ्यमानः प्रयोगः औपचारिकैवावगन्तव्यः इति स्वीकर्त्तुं शक्यते।

**यथार्थानुभवः**

अनु प्रमाणव्यापारादनन्तरं यः भवति सोऽनुभवः इति व्युत्पत्त्यनुसारेण प्रमाणजन्यज्ञानत्वमनुभवलक्षणम्। प्रत्यक्षानुमित्युपमितिशब्दानुभवानां क्रमेण प्रत्यक्षानुमानोपमानशब्दप्रमाणव्यापारादनन्तरं जायमान–ज्ञानतया तेषु लक्षणसमन्वयः। स्मृतेः उत्पत्तौ प्रमाणव्यापारस्यानपेक्षणीयतया न तत्रोक्तलक्षणातिव्याप्तिः।

**यथार्थानुभवभेदाः**

प्रकरणग्रन्थेषु प्रत्यक्षानुमित्युपमितिशाब्दभेदात् यथार्थानुभवस्य चत्वारः प्रकाराः प्रतिपादिताः। तत्र प्रत्यक्षशब्दः प्रमाणप्रमेयप्रमितिषु त्रिष्वर्थेषु प्रयुज्यते। प्रमाणे प्रवर्त्तमानः प्रत्यक्षशब्दः अक्षमक्षं प्रति वर्त्तत इति व्युत्पत्त्या निष्पद्यते। वात्स्यायनेन न्यायभाष्ये[11], प्रमाणे प्रत्यक्षशब्दप्रयोगविषये इदमेवाभिमतं प्रतिपादितम्। किन्तु उदयनाचार्येण प्रत्यक्षप्रमाणेऽपि प्रत्यक्षशब्दस्य प्रयोगप्राचुर्यवशात् प्रत्यक्षशब्दस्य प्रयोगं रूढ़िरूपतया मन्यते। प्रति विषयं प्रतिगतमर्थात् विषयेण सन्निकृष्टमक्षमिन्द्रियं यस्मै प्रयोजनाय तत्प्रत्यक्षमिति व्युत्पत्त्या प्रत्यक्षशब्दः प्रत्यक्षप्रमाणं प्रवर्त्तते। यं प्रतिगतमक्षं सविषयः प्रत्यक्ष इति व्युत्पत्त्या प्रत्यक्षशब्दः प्रत्यक्षप्रमेयघटादिविषये प्रवर्त्तते।

**प्रत्यक्षलक्षणम्**

न्यायसिद्धान्तमुक्तावल्यामिन्द्रियजन्यं ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणं प्राप्यते।[12] तर्कसंग्रहे च इन्द्रियार्थसन्निकर्षजन्यज्ञानं प्रत्यक्षमिति[13] लक्षणमुपलभ्यते। प्रशस्तपादेन[14] प्रत्यक्षशब्दव्युत्पत्तिमवलम्ब्य तल्लक्षणमुक्तम्। महर्षिगौतमेन[15] इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं व्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमित्येवं प्रत्यक्षलक्षणमुपन्यस्तम्। किन्तु लक्षणमिदं भ्रमभिन्नस्य जन्यप्रत्यक्षस्यैव लक्ष्यत्वे निर्दिष्टं भवितुमर्हति प्रत्यक्षमात्रस्य लक्ष्यत्वे तु संशयाद्यात्मके ईश्वरीये च प्रत्यक्षेऽव्याप्त्यापत्तेः। अतो लक्षणस्यास्य निखिलप्रत्यक्षसंग्राहकत्वाभावेन लक्षणान्तरमेव गवेषितव्यम्। अतएव न्यायसिद्धान्तमुक्तावलीकृता विश्वनाथेन ज्ञानाकरणकं ज्ञानं प्रत्यक्षमित्येवं प्रत्यक्षलक्षणमुक्तम्।[16]

**प्रत्यक्षज्ञानस्योत्पत्तिविधिः**

प्रत्यक्षज्ञानमिन्द्रियसन्निकृष्टादर्थाज्जायते। अत्र आत्मा पूर्वं मनसा संयुज्यते, ततो मनः इन्द्रियेण, इन्द्रियमर्थेन च संयुज्यते। तदित्थं परम्परया ग्रहीतुः आत्मनः ग्राह्यस्यार्थस्य च मिथः सान्निध्ये सति आत्मनि प्रत्यक्षात्मकमर्थज्ञानं प्रादुर्भवति। अत्राऽयं प्रश्नः समुदेति यत् प्रत्यक्षज्ञाने यदि इन्द्रियार्थसंयोग इव आत्ममनःसंयोगः इन्द्रियमनःसंयोगश्चापि कारणं तदा तावुपेक्ष्य इन्द्रियार्थसन्निकर्षघटितमेव प्रत्यक्षलक्षणं किमर्थं न्यायसूत्रकृता कृतमिति। अत्राऽस्योत्तरेण प्रतिपाद्यते यत् आत्ममनःसंयोगः न केवलं प्रत्यक्षज्ञान एव हेतुः, अपितु अनुमित्याद्यावपि हेतुः। अतस्तज्जन्यज्ञानत्वस्य प्रत्यक्षलक्षणात्वाभिगमे अनुमित्यादिष्वतिव्याप्तिः स्यात्। अतः आत्ममनःसंयोगस्य लक्षणघटकत्वमुपेक्षितम्। इन्द्रियमनःसंयोगः यद्यपि प्रत्यक्षज्ञानस्यैव हेतुस्तथापि तस्य प्रत्यक्षे तदीयत्वव्यवहारस्य रूपप्रत्यक्षं, रसप्रत्यक्षमित्यादिरूपस्य प्रवर्त्तते समर्थतया न तदादाय लक्षणं प्रणीतम्।

**प्रत्यक्षप्रमाणलक्षणम्**

तर्कभाषायां साक्षात्कारिप्रमाकरणं प्रमाणलक्षणमुक्तम्।[17] साक्षात्कारित्वं नाम प्रत्यक्षत्वापरपर्याया जातिः, तादृश– जातिमत्या प्रमायाः यत् करणं तत् प्रत्यक्षम्। इन्द्रियमिन्द्रियार्थसन्निकर्षः निर्विकल्पकज्ञानञ्च प्रमाविषयकदृष्टिभेदेन प्रत्यक्षप्रमाणतां विभर्तीति तर्कभाषायाः तत्पूर्ववर्तिनीनां न्यायभाष्यन्यायवार्तिकप्रशस्तपादभाष्यानाञ्च परिशीलनात् परिज्ञायते। यदा हि निर्विकल्पकप्रत्यक्षं प्रमात्वेनानुमतं भवति तदा इन्द्रियं प्रत्यक्षप्रमाणम्। इन्द्रियार्थसन्निकर्षश्च तद्व्यापारो भवति। यदा च सविकल्पकप्रत्यक्षं प्रमात्वेनाभ्युपेयते तदा इन्द्रियार्थसन्निकर्षः प्रत्यक्षप्रमाणं निर्विकल्पकप्रत्यक्षञ्च तद्व्यापारः, यदा च हेयत्वबुद्धिरूपादेयत्वबुद्धिः उपेक्ष्यत्वबुद्धिर्वा प्रत्यक्षप्रमात्वेनाभ्युपगम्यते तदा निर्विकल्पकप्रत्यक्षं प्रमाणं सविकल्पकञ्च प्रत्यक्षं तद्व्यापारो भवति।

**प्रत्यक्षज्ञानस्य भेदाः**

प्रत्यक्षज्ञानं साधारणतया द्विविधं भवति। निर्विकल्पकं सविकल्पकञ्चेति। विकल्पो नाम विशेषणं प्रकारो वा। तद्यस्य विषयो न भवति तन्निर्विकल्पकम्। यस्य च विषयो भवति तत्सविकल्पकम् । अतः एवमपि वक्तुं शक्यते यदविशिष्टज्ञानं निर्विकल्पकं विशिष्टज्ञानञ्च सविकल्पकमिति। निर्विकल्पकज्ञानं हि वस्तुनः स्वरूपमात्रमवगाहते, तत्र कस्यचित् विशेषणविधया विशेषविधया संसर्गविधया वा भानं न भवति। सविकल्पकज्ञाने च वस्तूनां भानं विशेषणविशेषसंसर्गविधया भवति। अत्र सविकल्पकज्ञानं विषयविशिष्टतया गृह्यते, निर्विकल्पकञ्च तथा न गृह्यते । न्यायमुक्तावल्यां विश्वनाथेन निर्विकल्पकस्य अतीन्द्रियत्वमुक्तम् । यथा –

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।[18]

निर्विकल्पकं यद्यतीन्द्रियं तर्हि कथं तत्प्रत्यक्षमिति न शंकनीयम्। स्वस्वरूपातीन्द्रियत्वस्य स्वविषये प्रत्यक्षत्वस्य सम्भवात्। अत्र विश्वनाथेन तु निर्विकल्पकसविकल्पकयोः प्रत्यक्षप्रमाभेदत्वमनभ्युपगम्य प्रत्यक्षज्ञानभेदत्वमेवाभ्युपगतम्। निर्विकल्पकस्य भ्रमप्रमाभिन्नत्वेऽपि इन्द्रियार्थसन्निकर्षजन्यतया प्रत्यक्षज्ञानत्वं निर्विवादमेव। निर्विकल्पकञ्च तन्मते भ्रमप्रमाभिन्नमेव।

**सविकल्पकप्रत्यक्षम्**

यत् प्रत्यक्षं केनचिद् विशेषणेन विशिष्टं वस्तुं विषयीकरोति तत् सविकल्पकं प्रत्यक्षं भवति। इदं हि प्रकारतानिरूपकप्रत्यक्षत्वेन विशेष्यतानिरूपकप्रत्यक्षत्वेन संसर्गतानिरूपकप्रत्यक्षत्वेन च लक्षयितुं शक्यते । इदं हि प्रत्यक्षं मनसाऽनुव्यवसीयति। अतो नेदं निर्विकल्पकवदतीन्द्रियम्। अत्र प्रयुज्यमानः सविकल्पकं शब्दः सप्रकारकत्वविशिष्टप्रत्यक्षे योगरूढः।

प्रकारान्तरेण प्रत्यक्षस्यास्य नित्याऽनित्यभेदाभ्यां भेदद्वयं प्रदर्श्यते। यथा – ईश्वरगतं प्रत्यक्षं नित्यं, जीवगतप्रत्यक्षमनित्यं, तत्पुनः द्विविधं बाह्यमान्तरञ्च। द्विविधमपि अनित्यप्रत्यक्षं लौकिकाऽलौकिकभेदाभ्यां द्विविधम्। तथा च इन्द्रियभेदेन षड्विधं लौकिकप्रत्यक्षं त्रिविधं चालौकिकप्रत्यक्षमुच्यते। सर्वलौकिकप्रत्यक्षं निर्विकल्पकसविकल्पकभेदाभ्यां द्विविधम्। अलौकिकञ्च सर्वं प्रत्यक्षं सविकल्पकमेव।

**लौकिकप्रत्यक्षम्**

लौकिकप्रत्यक्षं षड्विधाल्लौकिकात्सन्निकर्षाज्जायते। लौकिकसन्निकर्षाश्च संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यश्चेति षड्।[19] तत्र संयोगे द्रव्यग्राहकः, संयुक्तसमवायः द्रव्यसमवेतानां गुणकर्मसामान्यानां ग्राहकः। संयुक्तसमवेतसमवायः गुणकर्मगतानां जातीनां ग्राहकः, समवायः शब्दग्राहकः

समवेतसमवायश्च शब्दगतानां जातीनां ग्राहकः। विशेषणता चाभावग्राहिका।

**अलौकिकप्रत्यक्षम्**

अलौकिकसन्निकर्षः त्रिविधः सामान्यलक्षणा, ज्ञानलक्षणा योगजलक्षणा चेति।[20] इयं सामान्यलक्षणाप्रत्यासत्तिः इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूता अस्ति। यथा यत्रेन्द्रियसंयुक्तो धूमस्तद्विशेष्यकं धूम इति ज्ञानं यत्र जातं तत्र ज्ञाने धूमत्वं प्रकारः, तत्र धूमत्वेन सन्निकर्षेण धूमो इत्येवं रूपं सकलधूमविषयकं ज्ञानं जन्यते। अत्र यदीन्द्रियसम्बद्धमित्येवोच्यते, तदा यत्र धूलीपटले धूमत्वभ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्यात्, तत्र धूमत्वेन सहेन्द्रियसम्बन्धाभावात्। अत्र विश्वनाथः वदति[21] यत् – इन्द्रियसम्बद्धं धूलीपटलं, तद्विशेष्यकं धूम इति ज्ञानम्, तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः। इन्द्रियसम्बन्धश्च लौकिको ग्राह्यः, इदं च बहिरिन्द्रियस्थले। मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यमात्रं प्रत्यासत्तिः।[22] सामान्यलक्षणाप्रत्यासत्तिः तदाश्रयस्य ज्ञानं जनयति। ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विशेष्यकं ज्ञानं तस्यैव प्रत्यासत्तिरिति। सुरभि चन्दनमित्यत्र सामान्यलक्षणया सौरभभानं तथा च सौरभत्वस्य भानं ज्ञानलक्षणया सम्भवति। एवं यत्र धूमत्वेन धूलीपटलं ज्ञातं तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया भवति। योगाभ्यासजनितो धर्मविशेषः श्रुतिस्मृतिपुराणादिप्रतिपाद्यसन्निकर्षः योगजप्रत्यासत्तिरूच्यते।

**निष्कर्ष**

अतः ज्ञानाकरणकं ज्ञानं प्रत्यक्षज्ञानमित्युच्यते। इदं प्रत्यक्षं ज्ञानमिन्द्रियार्थयोः सन्निकर्षादुत्पद्यत इति स्वीकर्त्तुं शक्यते। साङ्ख्य–योगे अन्तःकरणत्रयमिन्द्रियप्रणालिकया विषयदेशं समुपस्थित्य विषयं गृह्णाति, यथा अन्तःकरणत्रयं चक्षुरिन्द्रियप्रणालीद्वारा बाह्यघटप्रदेशं प्राप्य घटाकारेण परिणमते, तदा अयं घटः इति ज्ञानमुत्पद्यते। परन्तु न्याय–वैशेषिके इन्द्रियार्थयोः सन्निकर्षेण ज्ञानमुत्पद्यते। अत्र एवं वक्तुं शक्यते यदयं सन्निकर्षः विषयदेशकाले भवतु अथवा इन्द्रियप्रदेशे, एतस्मात् सन्निकर्षाद् ज्ञानं तूत्पद्यते। तत्र साङ्ख्य–योगे ज्ञानस्याधारः बुद्धि स्वीक्रियते परन्तु अत्र न्याय–वैशेषिके ज्ञानस्याधारः आत्मा इति मन्यते।

**सन्दर्भ ग्रंथ सूची**

*Nyayakandali (A Commentary of Prashastapadabhashya) with Panjika & Kusumodgama, Ed. By Dr. J. S. Jetly and Vasant G. Parikh, Oriental Institute, Vadodara, India, 1991*

*न्यायभाष्यम्, प्रसन्नपद व्याख्यासहितम्, सम्पा० स्वामी द्वारिकादासशास्त्री, सुधी प्रकाशन, वाराणसी, १९८६.*

*वैशेषिकदर्शनम्, रसायनव्याख्यासहितम्, श्रीवीरराघवाचार्यः, Sreevathsa Press,Royapetta, Madras 1958*

*न्यायसिद्धान्तमुक्तावली, किरणावली साहिता श्रीकृष्ण–बल्लभाचार्य, चौखम्भ संस्कृत संस्थान, वाराणसी, २००३.*

*तर्कभाषा, आशुबोधिनी हिन्दी व्याख्या सहित, डॉ० सुरेन्द्रदेव शास्त्री, भारतीय प्रकाशन, चौक, कानपुर, १९७६.*

*तर्कसंग्रह, दीपिका, प्रकाश तथा नरहरि व्याख्या सहित, सम्पा० डॉ० सुधांशु कुमार षड्ङ्गी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०११.*

**अंत टिप्पणी**

1. *प्र.पा.भा., पृ. 402*
2. *तर्क.दी., पृ. 49*
3. *तर्क., पृ. 40*
4. *लक्षणावली, पृ. 23*
5. *सप्त., सू. 149*
6. *वाक्यकृत्तिः, पृ. 32*
7. *प्र.पा.भा., पृ. 405*
8. *'.... अनुभूतिश्चतुर्विधा। प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे।', कारिकावली, 51–52*
9. *क. 'विद्यापि चतुर्विधा, प्रत्यक्षलैंगिकस्मृत्यार्षलक्षणा।', प्र.पा.भा., पृ. 433*
   *ख. 'शब्दादीनामप्यनुमाने न्तर्भावः, समानविधित्वात्।', तत्रैवम्, 498*
10. *वै.सू., 9–2–12*
11. *न्या.सू.भा., 1–1–3*
12. *न्या.सि.मु., पृ. 182*
13. *तर्क., पृ. 59*
14. *'तत्राक्षमक्षं प्रतीत्योत्पद्यत इति प्रत्यक्षम्।', प्र.पा.भा., पृ. 433*
15. *न्या.सू., 1–1–4*
16. *न्या.सि.मु., पृ. 183*
17. *तर्कभाषा, पृ. 69*
18. *कारिकावली, का. 58*
19. *न्या.सि.मु., पृ. 200*
20. *कारिकावली, का. 63*
21. *न्या.सि.मु., पृ. 210*
22. *तत्रैवम्, पृ. 214*